(6) यदालोके सूक्ष्मं व्रजति सहसा तद्विपुलतां
यदर्द्धा विच्छिन्नं भवति कृतसन्धानमिव तत्।
प्रकृत्या यद्वक्रं तदपि समरेखं नयनयो
र्नं मे दूरे किञ्चित्क्षणमपि न पार्श्वे रथजवात्॥ ९॥

व्याख्या — श्लोकोऽयम् अभिज्ञानशाकुन्तलस्य प्रथमां-
कात् गृहीतोऽस्ति। प्रस्तुत श्लोके महाकविः रथवेगम् —
निरूपयति — राजा — नूनम् अवश्यम् तर्कयामीत्यर्थः
हरयः अश्वाः मदीयाः इत्यर्थः, हरिणम् लक्ष्यभूतमृगम् —
अतिक्रम्य वर्तन्ते वेगेनेति भावः —

यदालोके इति —
रथस्य जवो-वेगस्तस्मात्, यद्वस्तु आलोके दूराद् दर्शनेन,
सूक्ष्मम् - अतिदूरतया क्षुद्रम् आसीत्, यद्दूरे सूक्ष्मम् दृश्यत -
इत्यर्थः, तद्वस्तु - सहसा - हठादेव, विपुलतां - विशालतां, व्रजति -
प्राप्नोति सामीप्यादिति भावः, स्थूलं दृश्यत इत्यर्थः, तथा
यद्वस्तु अर्द्धा - तत्त्वतः एव, विच्छिन्नं - पृथक् पृथक् विभक्तम् -
आसीत्, तद्वस्तु कृतसन्धानमिव - कृत सन्धिवद् भवति, अपृ -
थग्भूतमिव दृश्यत इत्यर्थः, तथा यद्वस्तु प्रकृत्या - स्वभावतः
वक्रम् - विषमरेखं कुटिलमिति यावत्, आसीत्, तदपि वस्तु -
समरेखा - आभोगो यस्य तत् तादृशं भवति ऋजु इत्यर्थः।
तथा किञ्चिद् वस्तु मे - मम दुष्यन्तस्य, नयनयोः - नेत्रयोः,
क्षणमपि - स्वल्पकालमपि, न दूरे - असन्निधाने नवा पार्श्वे -
सन्निधाने विद्यते इति शेषः। अतिशीघ्रगमनाद् हेतोः —
वस्तूनां सन्निहितासन्निहितत्वव्यवस्था न वर्तते इति भावः।
श्लोकेऽस्मिन् कृतसन्धानमिव इत्यत्र उत्प्रेक्षालंकारः।
शिखरिणी वृत्तम्। "रसैः रुद्रैश्छिन्ना यमनसभलागः शिखरिणी।" -
इति तल्लक्षणं।

अनुवाद: — जो पहले देखने में सूक्ष्म दीखता, वही रथ के -
वेग से एकाएक बड़ा विशाल हो जाता है, जो वस्तु वास्तव में विच्छि -
न्न अलग है वह जुड़ा हुआ मालूम पड़ता है। जो वस्तु स्वभावतः -
टेढ़ी है, वह भी नेत्रों को सीधी मालूम पड़ती है। (मतलब यह है कि)
कोई वस्तु इस समय रथ के वेग से क्षणभर भी मेरे पास -
या दूर नहीं रह जाती।

Scanned by CamScanner